Click here to go back

॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

**अथ चंद्राष्टोत्तर शतनाम स्तोत्रं>**

**श्रीमान् शशधरश्चंद्रो ताराधीशो निशाकरः। सुधानिधिस्सदाराध्यस्सत्पतिस्साधुपूजितः॥ जितेंद्रियो जयोद्योगः ज्योतिश्चक्र प्रवर्तकः। विकर्तनानुजो वीरो विश्वेशो विदुषांपतिः॥ दोषाकरो दुष्टदूरो पुष्टिमान्शिष्टपालकः। अष्टमूर्तिप्रियोनंत कष्टदारु कुठारकः॥ स्वप्रकाशः प्रकाशात्मा द्युचरो देवभोजनः॥ कळाधरः कालहेतुः कामकृत्कामदायकः॥ मृत्युसंहारको मर्त्यो नित्यानुष्ठानदायकः। क्षपाकरः क्षीणपापः क्षयावृद्धि समन्वितः॥ जैवातृको शुचिश्शुभ्रो जयाजयफलप्रदः। सुधामयः सुरस्वामि भक्तानामिष्टदायकः॥ भुक्तिदो मुक्तिदो भद्रो भक्तदारिद्र्य भंजकः। सामगानप्रिय स्सर्वरक्षकस्सागरोद्भवः॥ भयांतकृत्भक्तिगम्यो भवबंध विमोचनः। जगत्प्रकाश किरणो जगदानंद कारणः॥ निस्सपत्नोय निराहारो निर्विकारो निरामः। भूच्छायाच्छादितो भव्यो भुवनप्रतिपालकः॥ सकलार्तिहर स्सौम्यजनक साधुवंदितः। सर्वागमज्ञस्सर्वज्ञो सनकादिमुनिस्तुतः॥ सितच्छत्रध्वजोपेत स्सितांगस्सितभूषणः। श्वेतमाल्यांबरधर श्श्वेतगंधानुलेपनः॥ दशाश्वरथसंरूढो दंडपाणिर्धनुर्धरः। कुंदपुष्पोज्वलाकारो नयनाब्जसमुद्भवः॥ आत्रेयगोत्रज्योत्यंत विनयः प्रियदायकः। करुणारससंपूर्णः कर्कटप्रभुरव्ययः॥ चतुरश्रासनारूढश्चतुरो दिव्यवाहनः। विवस्वन्मंडलज्ञेय वासो वसुसुमृद्धिदः ॥ महेश्वरप्रियो दांतः मेरुगोत्र प्रदक्षिणः। ग्रहमंडलमध्यस्थो ग्रसितार्को ग्रहाधिपः॥ द्विजराजो द्युतिलको द्विभुजो द्विजपूजितः। औदुंबरनगावासो उदारो रोहिणीपतिः॥ नित्योदयो मुनिस्तुत्यो नित्यानंद फलप्रदः। सकलाह्लादरो पलाशसमिधप्रियः॥ एवं नक्षत्रनाथस्य नाम्नां अष्टोत्तरं शतं॥ इति चंद्राष्टोत्तर शतनामस्तोत्रं॥**

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back